**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# काव्यमुखेन व्याकरणरचनापरम्पराया अनुशीलनम्

**भानुभक्त आचार्यः**
Department of Vyakaran (Sanskrit Grammar), Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History :*** *Submitted 07 Oct. 2023; Reviewed 19 Oct. 2023; Accepted 10 Nov. 2023*
***Corresponding Author :*** *Bhanubhakta Acharya,* ***Email :*** *bhanuacharya2018@gmail.com*
***DOI :*** *https://doi.org/10.3126/kdk.v4i1.64540*
*Copyright 2024 © the Author(s) and the Publisher*

**सारः**

*वैदिकवाङ्मये पुराणादौ च काव्यमाध्यमेन व्याकरणरचनापरम्परायाः मार्गदर्शकाः शास्त्रकाव्यत्वेन प्रथिताः कृतयः कात्स्न्र्येन नोपलभ्यन्ते । श्रुतौ आंशिकरूपेण पुराणादौ चानुषङ्गिकरूपेण व्याकरणस्य विषयाः पद्येनानुस्यूता वर्तन्ते । अस्मिन्नालेखे काव्यमाध्यमेन संस्कृतव्याकरणरचनापरम्पराया उपजीव्यविषया वेदे मिलन्तीति निर्धारणं विधाय तेषां संक्षेपेण विश्लेषणं कृतमस्ति । पुराणेषु प्रोक्ता काव्यमुखेन व्याकरणनिर्माणपरम्पराया अवस्थितिरत्र गवेषिताऽस्ति । अग्निपुराणे व्याकरणसम्बद्धाः कति अध्यायाः प्रोक्ताः सन्ति, संज्ञाविषये सन्धिविषये च कीदृशं व्याख्यानं मिलति, विभक्तिः कतिधा भवति, रूपचालनप्रक्रिया कीदृशी एतासां जिज्ञासानां समाधानं प्रस्तुतमस्ति । काव्यमुखेन व्याकरणनिर्माणपरम्पराया अनुशीलनक्रमे बृहन्नारदीयपुराणे पद्येन रचिता लादेशादिनियामका व्याकरणविषया विमृष्टाः सन्ति । गरुडमहापुराणे लिखितानां सिद्धशब्दज्ञानाय कल्पितानां विषयाणामनुशीलनं कृत्वा भविष्यपुराणे प्रोक्तविषयाणां संक्षिप्तविश्लेषणं विहितं वर्तते । काव्यमुखेन व्याकरणकाव्यकर्तारः कवयः के के वर्तन्ते, तैः कीदृशा ग्रन्था विरचिताः सन्ति, पाणिनिना विरचिते जाम्बवतीविजयकाव्ये व्याकरणसम्बद्धाः कीदृशो विषया सन्यस्ताः, बलचरितकाव्यस्य संक्षिप्तरिचयः कीदृग् वर्तते, एषां विषयाणां गवेषणं विश्लेषणञ्चात्र निष्पादितम् । वररुचिना प्रणीते स्वर्गारोहणकाव्ये शेषावतारेण पतञ्जलिना रचिते महानन्दककाव्ये च वर्णितानां विषयाणामन्वेषणविश्लेषणेऽत्र स्तः । रावणार्जुनीयकाव्ये लिखितानां भट्टिकाव्ये च काव्यमुखेन वर्णितानां व्याकरणविषयाणामध्ययनमत्र विहितं वर्तते । एवमेव प्रस्तुतोऽयं लेखो व्याकरणविषयमवलम्ब्य काव्यमाध्यमेन रचितानां कविरहस्यम्, कुमारपालचरितम्, सुभद्राहरणम्, वासुदेवविजयम्, धातुकाव्यमित्येतेषां व्याकरणकाव्यमूलकानां ग्रन्थनामनुशीलने विश्लेषणे च केन्द्रितो वर्तते । काव्यमाध्यमेन संस्कृतव्याकरणनिर्माणपरम्परा कीदृशी आसीदिति जिज्ञासासमाधाने प्रकृतमध्ययनं उपयोगि वर्तते । उपर्युक्तग्रन्थेषु प्रतिपादितविषयाणां पौर्वापर्यरूपेणाध्ययनाय समीक्षणाय चायमालेख उपकारको भविष्यति ।*

**शब्दकुञ्जी :** कृष्णकर्णाभरणम्, द्विरदः, द्व्याश्रयः, प्रकीर्णकाण्डम्, व्याडिः

## विषयप्रवेशः

पौरस्त्यवाङ्मस्य वेदपुराणादिग्रन्थेषु काव्यमुखेन व्याकरणनिर्माणपरम्परा क्रमिकरूपेण न मिलति । तत्र व्याकरणस्य स्वल्पतरा विषया बीजरूपेण वर्णिता वर्तन्ते । जाम्बवतीविजयम् नामकं काव्यं विरचय्य काव्यमाध्यमेन

व्याकरणलेखनपरम्परायां महर्षिणा पाणिनिनाग्रतमं कार्यं विहितम् । काव्येन व्याकरणलेखनपरम्परायां व्याडिविरचितं व्याकरणोदाहरणात्मकं बालचरितकाव्यं प्रसिद्धमस्ति । कात्यायनेन वररुचिनाऽपि व्याकरणोदाहरणात्मकं स्वर्गारोहणं महाकाव्यं प्रणीतमासीत् । प्रकृते लेखे महानन्दकाव्यम्, रावणार्जुनीयम्, भट्टिकाव्यम्, कविरहस्यम्, कुमारपालचरितम्, सुभद्राहरणम्, वासुदेवविजयम्, धातुकाव्यमित्यादिषु ग्रन्थेषु स्थितानां विषयवस्तूनामनुशीलनात्मकं विश्लेषणं विहितमस्ति ।

## समस्याकथनम्

काव्यमुखेन व्याकरणनिर्माणपरम्परा कीदृशी वर्तते ?

## उद्देश्यकथनम्

काव्यमुखेन व्याकरणनिर्माणपरम्पराया अन्वेषणम्

## पूर्वकार्यस्य समीक्षा

पाश्चात्याः शिक्षाशास्त्रविदो व्याकरणं काव्याद् दूरं स्थापयन्ति । व्याकरणशिक्षणाय गद्यमेव सरलपन्था वर्तते । संस्कृतभाषायान्तु अपवादरूपेण पद्यमयी अभिनवा शैली व्याकरणरचनायामनुसृता । क्षेमेन्द्रेण च सुवृत्ततिलकाख्ये ग्रन्थे 'भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते, इत्युक्तं वर्तते । पद्येन च व्याकरणशास्त्रस्य निर्माणं विधायाध्येतुं संरक्षयितुञ्च शक्यत इति तथ्ययुक्ता धारणा गोपालदत्तपाण्डेयमहाभागेन भट्टिकाव्यस्य (ई.सं.१९८१) भूमिकायां प्रस्तुता वर्तते । संस्कृतव्याकरणस्येतिहासलेखकेन युधिष्ठिसमीमांकेन *संस्कृतव्याकरणशास्त्र का इतिहास* (वि.सं.२०४१) इत्यस्य पुस्तकस्य ४७२ तमे पृष्ठे लक्ष्यप्रधानकाव्यकारो वैयाकरणकवि इति शीर्षकेन काव्यमुखेन व्याकरणनिर्माणपरम्परा अन्विष्टा वर्तते । पद्यमुखेन व्याकरणविषयमवलब्य काव्यनिर्माणपरम्परा दीर्घतमा वर्तते । कठिनानपि व्याकरणविषयान् काव्यमाध्यमेन रचयितुं शक्यत इति तदीयो निष्कर्षो वर्तते । लोकमणिदाहालो व्याकरणशास्त्रस्येतिहासः (वि.सं.२०४६) इत्यस्मिन् पुस्तके २२४ तमे पृष्ठे शास्त्रकाव्यानि तेषां प्रणेतारश्च इति शीर्षकेन 'व्याडिर्मुनित्रयं भट्टिर्भट्टभूमो हलायुधः । हेमचन्द्रो वासुदेवो भर्तृनारायणावपि । शास्त्रकाव्यप्रणेतारः शाब्दिकाः कवयस्मृताः ॥, इत्युल्लेखनं विधाय काव्यमुखेन व्याकरणशास्त्रकाराणां तद्विरचितकृतीनाञ्च परिचयं संक्षेपेण प्रस्तौति । पौरस्त्यवाङ्मयस्य इतिहासलेखकेन बलदेवोपाध्यायमहोदयेन *संस्कृतवाङ्मय का बृहद् इतिहास* (वि.सं.२०५८) इत्यस्य पुस्तकस्य ३८३ तमे पृष्ठे व्याकरणखण्डस्य इतिहासलेखनक्रमे लक्ष्यप्रधानकाव्यशास्त्रकार:, इति शीर्षकमाध्यमेन काव्यमुखेन व्याकरणकाराणां तद्विरचितग्रन्थानाञ्च परिचयः प्रस्तुतो वर्तते । संस्कृतशास्त्रे काव्यमाध्यमेन शास्त्रीयपदार्थानां निर्वचनप्रक्रिया रामायणे महाभारते चोपलब्धा वर्तते। व्याकरणशास्त्रस्य दुर्बोधतां परिहर्तुं काव्यमुखेन विहितं व्याकरणनिर्माणकार्यं सामयिकमस्तीति तदीयो विचारः । इतोऽतिरिक्तान्यध्ययनानि न दृश्यन्ते । अतो विधीयमानमध्ययनमौचित्यपूर्णमिति कार्येऽस्मिन् अध्येतुः प्रयत्नः ।

## अध्ययनविधिः

काव्यमुखेन व्याकरणनिर्माणपरम्पराया अनुशीलनात्मकं विश्लेषणमितिविषये केन्द्रितेऽस्मिन्नध्ययने सामग्रीसङ्कलने पुस्तकालयस्य प्रयोगो विहितोऽस्ति । विषयसम्बद्धानां लेखकानां कृतीनाञ्चान्विष्टाः परिचायका विषयाः प्राथमिकस्रोतसामग्रीरूपेण विषयसम्बद्धा ऐतिहासिकग्रन्था द्वितीयस्रोतसामग्रीरूपेण प्रयुक्ता वर्तन्ते । अत्र निगमनात्मकविधिमनुसृत्य मुख्यविषयस्याध्ययनं विहितमस्ति । पादटिप्पणीप्रदाने सन्दर्भसूचीव्यवस्थापने च एपिए पद्धतिरनुसृता वर्तते ।

**काव्यमुखेन व्याकरणरचनापरम्पराया उपजीव्यत्वम्**

वैदिकवाङ्मये व्याकरणशास्त्रस्य प्रशंसायामनेके मन्त्रा भिन्नभिन्नस्थानेषूपलब्धाः सन्ति । यजुर्वेदस्य सप्तदशेऽध्याये स्थिते सुप्रसिद्धे मन्त्रे व्याकरणस्य विषया वृषभरूपकत्वेन प्रतिपादिताः सन्ति । यथा–

**चत्वारि श्रृङ्गाः त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्ता सोऽस्य ।**

**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यांम् आविवेश ॥** (यजुर्वेदे, वि.सं. २०४४, . १७ /९१ )

अत्र वाग्रूपो वृषभः परापश्यन्तीमध्यमावैखरीभिस्तथा नामाख्यातोपसर्गनिपातरूपैश्च चतुर्भिः शृङ्गैः, भूतभविष्यद् वर्तमानाख्यैस्त्रिभिः पादैः, नित्यकार्यरूपाभ्यां द्वाभ्यां शिरोभ्याम्, विभक्तिरूपैः सप्तभिर्हस्तैः समन्वितोऽस्ति । अभिव्यक्तिप्रसङ्गे उरः कण्ठतालुषु त्रिषु स्थलेषु बद्धः सन् वाचं सरीसृज्यते । तथाविधो महान् देवः= शब्दतत्त्वाख्यो मरणशीलेषु देहेषु प्रविष्टो वर्तते । तेन सह सायुज्यलाभार्थं सर्वजनैर्व्याकरणमनुशीलनीयमिति तात्पर्यपरकं व्याख्यानं प्रकाशितम् । "ओङ्कारं पृच्छामः को धातुः ? किं प्रातिपदिकम् ? किं नामाख्यातम् ? किं लिङ्गम् ? किं वचनम् ? का विभक्तिः ? कः प्रत्ययः ? कः स्वरः ? उपसर्गो निपातः । किं वै व्याकरणम् ? को विकारः ? को विकारी ? कति मात्रा ? कतिवर्णः ? कत्यक्षराः ? कति पदानि ? कः संयोगः ? किं स्थाननादानुप्रदानानुकरणम् ।" इति गोपथब्राह्मणे व्याकरणस्य महती चर्चा मिलति । ऐतरेयब्राह्मणग्रन्थे सप्तधा वै वागभवत् (उपनिषदि वि.सं.२०५५ : पृ. ३०७) इति विवेचनं लभ्यते । तैत्तिरीयोपनिषदि वर्णः, स्वरः, मात्रा, सन्धीनां वर्णनमुपलभ्यते । निघण्टुनामके वेदस्य व्याकरणग्रन्थे, तद्व्याख्याभूते निरुक्तग्रन्थे प्रातिशाख्यादिग्रन्थे शिक्षाग्रन्थे च श्लोकात्मकव्याकरणस्य सुदीर्घपरम्परा प्रतिपादिता वर्तते । तदुक्तं निरुक्तस्वरूपविवेचनक्रमे–

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।**

**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥** (मिश्रः, ई.सं २००९, पृ. २७९) ।

एतावता वेदेषु काव्यमुखेन व्याकरणनिर्माणपरम्पराया बलीयस्त्वमुपजीव्यत्वं सिद्ध्यति ।

**पुराणप्रयुक्ता काव्योन्मुखी व्याकरणपरम्परा**

काव्यात्मकशब्दशास्त्रस्यैतिह्यरचनाया अन्वेषणक्रमे विभिन्नपुराणेषु व्याकरणसम्बद्धसूत्रार्थोदाहरणविषयाः समुपलभ्यन्ते । तेषु अग्निपुराणस्य बहुष्वध्यायेषु बृहन्नारदीयस्य गरुडमहापुराणस्य च चतुरधिकेष्वध्यायेषु अनुष्टुबादिविविधच्छन्दोमाध्यमेन व्याकरणविषया विविक्ताः सन्ति। तत्र अग्निपुराणस्य ऊनपञ्चाशदधिकत्रिशतमेऽध्याये अक्षरसमाम्नायवर्णम्, प्रत्याहारसिद्धिः, तत्प्रयोगादिविधयश्च वर्णिताः सन्ति, तद्यथा–

**प्रत्याहारादिकाः संज्ञाः शास्त्रसंव्यवहारगाः ।**

**उपदेश इद्धलन्तं भवेदजनुनासिकः ॥**

**आदिवर्णो गृह्यमाणोऽप्यन्त्येनेता सहैव तु ।**

**तयोर्मध्यगतानां स्यात् ग्राहकः स्वस्य तद्यथा ॥** (अग्निपुराणे, वि.सं.२०२३, पृ.५११) ।

अग्निपुराणस्य पञ्चाशदधिकत्रिशततमेऽध्याये पञ्चसन्धीनां विवरणमुदाहरणमाध्यमेन त्रयोदशश्लोकैर्वर्णितमस्ति। एवमेव स्वादिप्रत्ययविभक्तिविश्लेषणम्, अजन्तादिषड्लिङ्गप्रकरणस्थानां रूपावलीनां विश्लेषणम्, कारकस्य विश्लेषणम्, अकाराकारेकारोकारान्तशब्दानां हलन्तशब्दानां सर्वनामसंज्ञकानां सङ्ख्यावाचकानामृकारान्तशब्दानां तेषां रूपावलीनाञ्च विवेचनं पद्यमाध्यमेन अग्निपुराणस्य एकपञ्चाशदधिकत्रिशततमेऽध्याये त्र्यधिकसप्ततिश्लोकैर्विश्लेषितं वर्तते । तत्र सुब्विभक्तिव्यवस्थापकानि पद्यानि अधोनिर्दिश्यन्ते तद्यथा–

स्कन्द उवाच-

**विभक्तिसिद्धरूपञ्च कात्यायन वदामि ते ।**
**द्वे विभक्ती सुप्तिङश्च सुपःसप्तविभक्तयः॥**
**द्विविधं प्रातिपदिकं ह्यजन्तञ्च हलन्तकम् ।**
**प्रत्येकं त्रिविधं तत्स्यात् पुमांस्त्री चनपुंसकम् ॥**
**वृक्षः सर्वोऽथ पूर्वश्च प्रथमश्च द्वितीयकः ।**
**सुरा रा गौस्तथाद्यौग्लौः स्वरान्ता पुंसि नायकाः॥**
**स्त्रियां जाया जरा बाला एडका सह वृद्धया ।**
**चतस्र विदुषीचैव केयं दिक् दृक् च तादृशी ॥**
**असौ स्त्रियां नायकाश्च नायकाश्च नपुंसके ।**
**एतेभ्यः प्रथमादयश्च स्युः प्रातिपदिकात्पराः ॥**
**धातुप्रत्ययहीनं यत्स्यात् प्रातिपदिकन्तु तत् ।**
**प्रातिपदिकात् स्वलिङ्गार्थवचने प्रथमा भवेत् ॥**
**सम्बोधने च प्रथमा उक्ते कर्मणि कर्त्तरि ।**
**कर्म यत् क्रियते तत्स्यात् द्वितीया कर्मणि स्मृताः ॥**
**अनुक्ते तिङ्कृत्तद्धितैस्तृतीया करणे भवेत् ।**
**यस्मै दित्सा धारयते सम्प्रदानं तदीरितम् ॥**
**अपादाने पञ्चमी स्यात् स्वस्वम्यादौ च षष्ठ्यपि ।**
**आधारो योऽधिकरणं विभक्तिस्तत्र सप्तमी ॥** (अग्निपुराणे, वि.सं.२०२३, पृ.५१२) ।

अग्निपुराणस्य द्विपञ्चाशदधिकत्रिशततमेऽध्याये स्त्रीलिङ्गवाचकानां रमाद्याबन्तशब्दानां ह्रस्वेकारदीर्घेकारान्तानां बुद्धिनद्यादिशब्दानां वागादिहलन्तशब्दानां सर्वेदमदसादिसर्वनाम-संज्ञकशब्दानाञ्च रूपाणामावलीः श्लोकात्मकरीत्या त्रयोदशश्लोकैर्विवेचिता वर्तन्ते । टाबन्तरमाशब्दस्य पद्यानि यथा–

**रमा रमे रमाः शुभा रमां रमे रमास्तथा ।**
**रमया च रमाभ्याञ्च रमाभिः कृतमव्ययम् ।**
**रमायै च रमाभ्याञ्च रमाया रमयोः शुभम् ।**
**रमाणाञ्च रमायाञ्च रमास्वेवं कलादयः ॥**

त्रिपञ्चाशदधिकत्रिशततमेऽध्याये नपुंसकलिङ्गवाचकशब्दानां तद्वाचकानामेव सर्वादिशब्दानाञ्च रूपावलिर्नवभिः श्लोकैरुल्लिखिता वर्तते । अस्मत्शब्दस्य रूपावलिरधोलिखितानुष्टुप्पङ्क्त्यनुसारेण वर्णिता सन्ति । यथा–अहमावां वयं मां वै आवामस्मान्मया कृतम् । आवाभ्याञ्च तथास्माभिर्मह्यमस्मभ्यमेव च। मदावाभ्यामदस्मच्च पुत्रोऽयं मम चावयोः । अस्माकमपि चास्मासु त्वं युवां यूयमीजिरे ॥ चतुःपञ्चाशदधिकत्रिशततमेऽध्याये सम्पूर्णकारकस्योदाहरणानि पञ्चविंशतिश्लोकै र्वर्णितानि वर्तन्त अग्निपुराणे । उदाहरणरूपेण सप्तमीकारकस्य पद्यानि सङ्गृहीतानि यथा–

**चतुर्धा चाधिकरणं व्यापकन्दध्नि वै घृतम् ।**
**तिलेषु तैलं दैवार्थमौपश्लेषिकमुच्यते ॥**
**गृहे तिष्ठेत् कपिर्वृक्षे स्मृतं वैषयिकं यथा ।**
**जले मत्स्यो वने सिंहः स्मृतं सामीप्यकं यथा ॥**
**गङ्गायां घोषो वसति औपचारिकमीदृशम** (अग्निपुराणे, वि.सं.२०२३, पृ.५१३) ।

अपञ्चपञ्चाशदधिकत्रिशततमेऽध्याये समासस्य विवेचनमष्टादशभिः श्लोकैर्वर्णितमस्ति तत्र षोढा, अष्टाविंशतिधा, नित्याऽनित्याविभागेन लुगलुगलोपेन च द्विधादिसमासव्यवस्थोदाहरणमाध्यमेन अग्निपुराणे वर्णिता वर्तते। षड्पञ्चाशदधिकत्रिंशततमेऽध्याये तद्धितवृत्तीनां विवरणं त्रिंशद्भिः श्लोकैर्विहितं वर्तते। तत्र ल इलच् श न अणादिप्रत्ययादारभ्य कप्रत्ययान्तपर्यन्तानां निष्पन्नानां शब्दानामुदाहरणमुखेन पद्यानि समुदाहृतानि सन्ति। सप्तपञ्चाशदधिकत्रिशततमेऽध्याये उणादिप्रत्ययेन निष्पन्नशब्दानां विवरणमेकादशभिः श्लोकैः समुपवर्णितं वर्तत अग्निपुराणे। तिङ्विभक्त्यन्तक्रियावाचकधातुरूपाणामुदाहरणं सकर्मकाकर्मधातु नियमनं लादेशानां तिङामर्थनिर्धारणमात्मनेपदपरस्मैपदविवेचनं णिच्यङ् नामधात्वादिप्रक्रियाविश्लेषणञ्च अग्निपुराणस्य अष्टापञ्चाशदधिकत्रिंशततमेऽध्याये त्रिशत्ः श्लोकैर्वर्णनं विहितं वर्तते। भावे कर्मणि कर्तरि चार्थे प्रयुज्यमानानां कृत्प्रत्ययान्तसिद्धक्रियारूपाणां शब्दानां सामान्यविवरणमग्निपुराणस्य ऊनषष्ट्यधिकत्रि शततमेऽध्याये अष्टभिः श्लोकै र्विवर्णितमस्ति। बृहन्नारदीयपुराणेऽपि काव्यात्मकव्याकरणनिर्माणपरम्परायाः प्रभाव उपलभ्यते। तत्र वर्णिता व्याकरणव्यवस्था एकस्मिन् द्विपञ्चाशत्तमेऽध्याये विन्यस्ता वर्तते बृहन्नारदीये पुराणे। व्याकरणस्य सुब्विभक्ति-निर्धारकाणां कारकाणां नियमाः श्लोकमाध्यमेनोपस्थापिताः सन्ति। लिङादेशानां तिङां विवरणं प्रदर्श्य शब्लुकादिदशगणप्रक्रियाया वर्णनं सूत्रं विना पद्येन विहितमस्ति। णिजन्तप्रकरणादारभ्य लकारार्थप्रक्रियापर्यन्तानां णिच्छनादिप्रत्ययानामर्थान् उदाहरणानि च निरूप्य पञ्चसन्धिगतानां प्रयोगाणामल्परूपेण सन्निवेशनं वर्तते। अजन्तादिषड्लिङ्गप्रक्रियाया रूपावलीनां नाममात्रेण वस्तुनिदर्शनं विधाय तद्धितप्रत्ययनिष्पन्नानां केषाञ्चन शब्दानां वर्णनं विहितमस्ति। भावे कर्मणि कर्तरि च विहितानां कृत्यक्तेत्यादिकृदन्तप्रत्ययनिष्पन्नानां शब्दानां नाममात्रेण विषयवस्तुनः सङ्केतं विधाय समासस्य च नामोत्टङ्कनकार्यमनुष्टुप्पद्यमाध्यमेन अष्टाशीतिश्लोकै र्विवर्णितमस्ति। श्लोकात्मकव्याकरणव्यवस्थाया वर्णनक्रमे प्रथमं तावत् अध्यायस्य प्रारम्भे अष्टाभिः श्लोकैः कारकविभक्तीनां वर्णनं विहितं वर्तते। लादेशानां तिङाम्, भू, अद्, हू, दिवित्यादिदशगणप्रक्रियारम्भस्थानां धातूनाम् , भवतीत्यादिशबादिविकरणप्रत्ययानां रूपावलिश्च सप्तदशभिः श्लोकै र्वर्णिता वर्तते। कानिचन पद्यानि यथा–

**भूवादिषु तिङन्तेषु लकारा दश वै स्मृताः।**
**तिप्तस्सन्तीति प्रथमो मध्यमः सिप्तथोत्तमः॥**
**मिब्वस्मसः परस्मै तु पादानां चात्मनेपदम्।**
**त आते प्रथमो मध्य से आथेध्वे तथोत्तमः॥**
**नाम्नि प्रयुज्यमाने तु प्रथमः पुरुषो भवेत्।**
**मध्यमो युष्मदि प्रोक्त उत्तमपुरुषोऽस्मदि॥**
**भवति बभूव भविता भविष्यति भवत्वभवद्भेच्चापि।**
**भूयादभूभविष्यलादेशैतानि रूपाणि॥**
**अत्ति जघासात्तात्स्यत्यत्तवाददद्यदघसदात्स्यत्।**
**प्रयोजके भावयति सनीच्छायां बुभूषति॥**
**क्रियासमभिहारे तु पण्डितो भूयते मुने।**
**तथा यङ्लुकि बोभवीति च पठ्यते॥**
**पुत्रीयत्यात्मनीच्छायां तथाचारेऽपि नारद,** (बृहन्नारदीयपुराणे, ई.सं.१९८९, पृ.२६८)।

अनेन प्रकारेण णिच्सन्यङ्नामधातुप्रकरणे निरूपितानां प्रत्ययानामर्थवर्णनम्, धातूनामुपसर्गादियोगावस्थानुसारेण परस्मैपदात्मनेपदनिरूपणम्, कर्मकर्तृप्रक्रियायाः, द्विकर्मकबुद्ध्यर्थक- शब्दकर्मकाणां धातूनां तिङर्थस्य च नाममात्रेण

वर्णनं नवभिः श्लोकै र्विहितमस्ति । एवमेव पञ्चसन्धिगतानामच्प्रकृतिभावादिसन्धीनामुदाहरणात्मकं वर्णनमेकादशभिः श्लोकैर्विहितं वर्तते । अजन्तपुँल्लिङ्गादिषड्लिङ्गप्रकरणस्थानाम्, अकारेकारोकारोकारौकारान्तपुंलिङ्गवाचकशब्दानाम्, आकारे- कारोकारोकारऋकारौ-कारान्तेत्यादीनां स्त्रीलिङ्गवाचकशब्दानाम्, कुलाक्ष्यादिनपुंसकलिङ्गवाचक शब्दानाम्, पुंस्त्रीनपुंसकलिङ्गस्थानां हलन्तशब्दानां सर्वनामसंज्ञकशब्दानाञ्च स्वरूपनिदर्शनात्मकं वर्णनं सार्धषोडशैः श्लोकैः कृतमस्ति । तद्धिताऽधिकारान्तर्गतानाम् अपत्याद्यर्थे देवतार्थे भवार्थे स्वार्थे तुल्यार्थे भावार्थे मत्वर्थे जातार्थे गुणवचनप्रमाणार्थे सङ्ख्याद्यर्थे च विहितानां शैषिकप्रत्ययान्तशब्दानामपि स्वरूपमात्रवर्णनं द्वाविंशतिश्लोकै र्विहितं वर्तते । पुनश्च पद्यात्मकव्याकरणपरम्परावर्णनक्रमे कृत्यक्तेत्यादि कृदन्तप्रयोगाणा मुट्टङ्कनं श्लोकद्वयेन कृतमस्ति । समासप्रक्रियाया निरूपणञ्च षड्भिः श्लोकैर्विहितं वर्तते बृहन्नारदीये पुराणे । बृहन्नारदीयपुराणस्य पूर्वभागस्थस्यैव त्रिपञ्चाशत्तमेऽध्याये सप्ताशीतिश्लोकै र्निरूक्तस्यापि वस्तुनिर्देशात्मकं वर्णनं लिखितं वर्तते ॥ मानवजीवनसञ्चालनाय वाग्व्यवहारोपयोगि विषयस्य व्याकरणस्य ज्यौतिषायुर्वेदादि-वेदस्याङ्गोपाङ्गादेश्चतुःषष्टिकलाविद्यायाश्च विवरणं सरलरीत्या काव्यात्मकमाध्यमेन गरुडमहापुराणे वर्णितं वर्तते।एवमेव वैदिकानां लौकिकानाञ्चानादिसिद्धानां पुण्यानां साधुशब्दानां प्रकृतिप्रत्ययादिविभागकल्पनेनान्वाख्यान रूपमनुशासनाय श्रीगरुडमहापुराणस्य पूर्वार्धभागस्थौ त्र्यधिकद्विशततमाध्यायचतुरधिकद्विशततमाध्यायौ महत्त्वपूर्णौ वर्तेते । सिद्धशब्दविवेकाय महागरुडपुराणस्य त्र्यधिकद्विशततमेऽध्याये कारकप्रकरणं तिङन्तप्रकरणं कृद्प्रकरणञ्च सूचितमस्ति । सिद्धोदाहरणबोधाय चतुरधिकद्विशततमेऽध्याये सन्धिसमासतद्धितादि व्याकरणव्यवस्थया साधितानां सिद्धशब्दानामुदाहरणात्मकाःकेचन श्लोका विन्यस्ता वर्तन्ते । तत्र सप्तदशश्लोकैः कारकप्रकरणस्य वर्णनं विहितमस्ति । उदाहरणरूपेण केचनश्लोका अधोलिखिता विद्यन्ते तद्यथा-

कुमार उवाच

**अथ व्याकरणं वक्ष्ये कात्यायन समासतः ।**
**सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे ॥**
**सुप्तिङन्तं पदं ख्यातं सुपः सप्तविभक्तयः ।**
**स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मजे ॥**
**सम्बोधने च लिङ्गादावुक्ते कर्मणि कर्तरि ।**
**अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम् ॥** (महागरुडपुराणे, ई.सं.१९८६, पृ.२९४) ।

अनया रीत्या सप्तभिः श्लोकैर्लादेशानां तिबादीनाम्, एकेन श्लोकेन कृदन्तस्य, दशभिः श्लोकैः पञ्चसन्धेः, सार्धश्लोकद्वयाभ्यां समासस्य, अर्धश्लोकेन तद्धितस्य, एकादशभिः श्लोकैः षड्लिङ्गप्रकरणस्य, श्लोकार्धेन श्रृणोत्यादिक्रियापदानाम्, अर्धश्लोकेनैव सर्वनामसंज्ञकानां शब्दानां नाममात्रेण दर्शितं वर्तते गरुडमहापुराणे ।

भविष्यपुराणस्य प्रतिसर्गपर्वणो द्वितीयखण्डे त्रिंशे एकत्रिंशे द्वात्रिंशे चाध्याये व्याकरणस्य पाणिनिव्याडिवररुच्यादिमहर्षीणां जीवनवृत्तं पितृशर्मणः पौत्रत्वेन ऋग्यजुस्सामाथर्वणां पुत्रत्वेन व्याकरणस्य विषयाः श्लोकमाध्यमेन वर्णिता वर्तन्ते।द्वात्रिंशेऽध्याये व्याकरणस्य व्याख्यातुर्वोपदेशस्य वर्णनं पद्यमाध्यमेन कृतमस्ति।पञ्चत्रिंशेऽध्याये शेषावतारमहाभाष्यकारः पतञ्जलिरेव योगाचार्यरूपेण प्रतिष्ठितोऽभूदिति वर्णनं मिलति । प्रतिसर्गपर्वणः चतुर्थखण्डस्याष्टमेऽध्याये आचार्यभट्टोजिदीक्षितस्य वर्णनं विहितं वर्तते । तत्र विद्याभिमानिनां व्याकरणस्य पाखण्डार्थपथारम्भकानां भट्टानां मतस्य तिरस्करणाय वेदशर्म्मणः पुत्रत्वेन भट्टोजिदीक्षितः काश्यां जातः । तेनैव प्रक्रियापक्षपोषकः सिद्धान्तकौमुदीनामको ग्रन्थो निर्मित इति चोल्लिखितं वर्तते । (भविष्यपुराणे वि.सं.२०६३, पृ. ३१८)। इति मन्येऽहं भविष्यपुराणोक्तमेतत् पूर्वोक्तकथनं कल्पान्तरोक्तं भवेत्, यतो हि व्याकरणसम्बन्धिनोऽन्यदीयग्रन्थादौ

संस्कृतवाङ्मयेतिहासे च तदभावात् ।

**काव्यमुखेन रचिता व्याकरणनिर्माणपरम्परा**

संस्कृतवाङमयस्य व्याकरणशिक्षणक्रमे समापतितं काठिन्यमपहर्तुं प्राचीनकालादेव विद्वांसो यतमाना आसन् । तेषु काव्यमुखेन रचितानां केषाञ्चन ग्रन्थानां ग्रन्थकाराणाञ्च विश्लेषणमधोलिखितानुसारेण विधीयते ।

**जाम्बवतीविजयम् (पातालविजयम्**)

भगवता पाणिनिना व्याकरणप्रशिक्षणकठिनतामपहर्तुम् एकोऽभिनवा प्रणाली आविष्कृता, सा प्रणाली काव्यमाध्यमेन व्याकरणस्य नियमोदाहरणानि अध्यापनार्थमासीत् । जाम्बवतीविजयम् (पातालविजयम्) नामककाव्यं विरचय्य काव्यमाध्यमेन व्याकरणलेखनपरम्परायां महर्षिः पाणिनिरग्रसरो बभूव । यद्यपि तत्काव्यं समग्रं नोपलभ्यते तथापि विद्वद्भिः स्वरचितग्रन्थेषु जाम्बवतीविजयकाव्यस्य व्याकरणसम्बद्धाः श्लोकाः तदंशाश्च च समुद्धृताः सन्ति । तेषु कानिचन पद्यानि अधोलिखितानुसारेण वर्तन्ते तद्यथा –

**हरिणा सह ते सख्यं बोभूत्विति यदब्रवीः ।**

**न जाघटीति युक्तौ तत् सिंहद्विरदयोरिव ॥** (मीमांसक, वि.सं.२०४१, पृ.४६४) ।

पद्यमिदं रामनाथविरचितकातन्त्रव्याकरणस्य भाषावृत्तौ समुद्धृतं वर्तते । अपरञ्च-

**मुखानि चारूणि घना पयोधरा नितम्बपृथ्व्यो जघनोत्तमश्रियः ।**

**तनूनि मध्यानि च यस्य सोऽभ्यगात् कथं नृपाणां द्रविडीजनो हृदः ॥**

जाम्बवतीविजयकाव्यस्य पद्यमिदं कवीन्द्रवचनसमुच्चये, अलङ्कारशेखरे, शार्ङ्गधरपद्धतौ, सदुक्तिकर्णामृते चोद्धृतं वर्तते । पुनश्च क्षेमेन्द्ररूप्यकाप्ययदीक्षित–शरण्यदेवानन्दवर्धनपुरुषोत्तम शार्ङ्गधरहेमचन्द्र श्रीचन्द्र- प्रभृतिभिः त्रिंशदधिकविपश्चिद्भिः पाणिनिविरचितजाम्बवतीविजयमहाकाव्यात् समुद्धृता एकत्रिंशत्श्लोका युधिष्ठरमीमांसकेन सङ्कलिताः सन्ति ।

भगवता पाणिनिना अष्टाध्यायीग्रन्थो हि आदौ संहितापाठमाध्मेन विरचित आसीत् । पुनः प्रवचनकाले सूत्रविच्छेदनादिकमवश्यं कृतं भवेत्, स्थानेऽन्तरतमः (पा.सू.१।१।५०) सूत्रस्थं भाष्यमेतदेव प्रमाणयति यथा 'पुनरियमन्तरतम निवृत्तिः सा किं प्रकृतितो भवेत् स्थानिन्यतरतमे षष्ठीति । आहोस्विदादेशतः स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति । कुतः पुनरियं विचारणा उभयथा हि तुल्या संहिता । स्थानेन्तरतम उरण् रपरः ।' इति व्याकरणमहाभाष्ये समुल्लिखितमस्ति । तत्र संहितापाठे एकश्रुतिस्वरमासीदिति मतं एकश्रुतिनिर्देशात् सिद्धम् इति व्याकरणमहाभाष्यस्य वार्तिके सुविचारितम्। मतमिदं कैयटादयः स्वीकुर्वन्ति । पुनश्च अष्टाध्यायीपाठस्थितानि कतिपयसूत्राणि श्लोकांशबद्धानि पद्यमयानि सन्ति तद्यथा–

वृद्धिरादैजदेङ्गुण : (पा.सू.१।१।१,१।१।२) अष्टाध्यायी

इग्यणः सम्प्रसारणम्, कृत्तद्धितसमासाश्च (पा.सू.१।२।४६) "

पक्षिमत्स्यमृगान् हन्ति परिपन्थं च तिष्ठति (पा.सू. ४।४।३५,४।४।३६) "

तदस्मै दीयते युक्तं श्राणामांसौदनाट्टिठन् (पा.सू. ४।४।६६, ४।४।६७) "

नोदात्तस्वरितोदयम् , तङानावात्मनेपदम् (पा.सू.८।४।६७, १।४।१००) " इति ।

यथा पाणिनिपूर्ववर्तिषु आपिशलिकाशकृत्स्नभागुर्याद्याचार्यरचितेषु सूत्रैः सह पाणिनिनिर्मितव्याकरणसूत्राणां सन्निकर्षो वर्तते श्लोकव्याकरणपरपरायां तथैव धातुपाठपरम्परायामपि श्लोकात्मकपाठस्य सन्निकर्षो लभ्यते । तद्यथा–

लज लाजि च भर्त्सने (वै.सि.कौ., धातुसङ्ख्या २३८, २३९पृ.२०१) ।

चते चरे च याचने - " " " , धातुसङ्ख्या ८६५,८६६, पृ.२१५) ॥ इति ।

पाणिनिशिक्षायाः सूत्रात्मकश्लोकात्मकयोः पाठयोर्मध्ये उभयोरेव लघुवृद्धपाठा- वुपलभ्येते, तत्र ज्येष्ठभ्रातृविहिते व्याकरणेऽनुजेन पिङ्गलाचार्येण तदुभयं पाणिनीयमतं विविच्य रचिता पाणिनिशिक्षा षष्टिश्लोकात्मिका पद्यमयी च वर्तते । तत्र वृद्धपाठस्य पिङ्गलाचार्यकृतपाठस्य च एकैकोदाहरणमधोलिखितानुसारेण वर्तते । तद्यथा– वृद्धपाठे –

**आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः ।**
**स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥**

पाणिनिशिक्षायां पिङ्गलाचार्यकृतप्रचलितपाठस्य श्लोकोऽपि उध्दृतो वर्तते ।
यथा–

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥** (मीमांसक, वि.सं.२०३०, पृ.७१ ) इति ।

र्विभिन्नच्छन्दोमाध्यमेन पाणिनिरचितैः सूत्रधातुशिक्षादिसम्बद्धै रेभिः पद्यै र्युधिष्ठिरमीमांसकेन पाणिनिव्याकरणे काव्यबद्धपाठस्यावस्थितिर्निर्धारिता वर्तते । पाणिनिपूर्ववर्तिन आपिशलिभागुरीत्यादिवैयाकरणाः काव्यमाध्यमेनैव ग्रन्थनिर्माणकार्यं कुर्वन्ति स्म, पाणिनिव्याकरणे च आपिशलव्याकरणस्योपजीव्यत्वमस्त्येव, अत अष्टाध्यायी च काव्यबद्धा सिद्धा भवति ।

**बलचरितकाव्यम्**

व्याडिना व्याकरणोदाहरणात्मकं बलचरितकाव्यं विरचितमिति ग्रन्थान्तरकृत्समुद्धरणतो ज्ञायते । यथोक्तं समुद्रगुप्तेन कृष्णचरिते मुनिकविवर्णनप्रसङ्गे–

**रसाचार्य : कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः ।**
**दाक्षीपुत्रवचो व्याख्या पटुर्मीमांसकाग्रणी : ॥**
**बलचरितं कृत्वा यो जिगाय भारतं व्यासं च ।**
**महाकाव्यविनिर्माणे तन्मार्गस्य प्रदीपमिव ॥** (मीमांसक, वि.सं.२०४१, पृ.४७३) ।

बलचरिते महाभारतादपि अधिकश्लोकाः समाविष्टाः सन्ति । पुनश्च लक्षश्लोकात्मकव्याकरणदर्शनस्य सङ्ग्रहग्रन्थश्च व्याडेरपरग्रन्थरत्नं वर्तत इति महाभाष्यादौ समुट्टङ्कितमस्ति । तथैवाज्ञातकर्तृकामरकोशस्य टीकायाम् 'कमपि भूभुवनाङ्गणकोणम्, इति व्याडिभाषासमावेशो मिलति अत्र भाषासमावेश इति व्याडिप्रणीतमहाकाव्यस्य कश्चिद् भागो बोध्यः । यथा भट्टिकाव्यस्य द्वादशसर्गे भाषासमावेशभागो वर्तते। काव्यस्यास्य प्रयोजनसाफल्यं कियदासीदिति वक्तुं न शक्यते ग्रन्थस्यास्य दौर्लभ्याद् इति युधिष्ठिरमीमांसकः प्रतिपादयति (मीमांसक, वि.सं.२०४१, पृ.३१५) इति ।

**स्वर्गारोहणकाव्यम्**

वररुचिनामाभिधेयेन कात्यायनेन व्याकरणोदाहरणात्मकं स्वर्गारोहणं महाकाव्यं प्रणीतमासीदिति ज्ञायते यथा हि समुद्रगुप्तः कृष्णचरिते मुनिकविवर्णनप्रसङ्गे कथयति–

**यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि ।**
**काव्येन रुचिरेणाऽसौ ख्यातो वररुचिः कविः॥**
**न केवलं व्याकरणं पुपोष दाक्षीसुतैस्येरितवार्तिकैर्यः ।**
**काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः ॥** (दाहालः,२०४६, पृ.२३०) ।

स्वर्गारोहणकाव्यस्यानेके श्लोकाः शार्ङ्गधरपद्धतौ, सदुक्तिकर्णामृते सुभाषितरत्नावल्याञ्चोद्धृताः सन्ति । भ्राजनामकाः कात्यायनप्रणीताः श्लोका महाभाष्यस्य प्रदीपोद्योतटीकायामुट्टङ्किता वर्तन्ते । पुनश्च कात्यायननिर्मितानि श्लोकबद्धानि कतिपयवार्तिकानि महाभाष्ये पतञ्जलिना व्याख्यातानि सन्ति । तद्यथा–

**अक्षरं नक्षरं विद्याद् अश्नोतेर्वा सरोऽक्षरम् ।**
**वर्णं वाहुःपूर्वसूत्रे किमर्थमुपदिश्यते ॥**
**वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।**
**तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥** (पतञ्जलिः, ई.सं.२००३, पृ.११८) ।

## महानन्दमयं काव्यम्

भगवता पतञ्जलिना व्याकरणोदाहरणात्मकं महानन्दाख्यं महानन्दमयसंज्ञितं काव्यं श्लोकमाध्यमेन प्रणीतमिति ग्रन्थान्तरगृहीतोद्धरणतो ज्ञायते । समुद्रगुप्तः कृष्णचरिते मुनिकविवर्णनप्रसङ्गे कथयति–

**महानन्दमयं काव्यं योगदर्शनमद्भुतम् ।**
**योगव्याख्यानभूतं तद् रचितं चित्तदोषापहम् ॥**

एवमेव पतञ्जलिना व्याकरणमहाभाष्ये कतिपयसूत्रोदाहरणानि श्लोकमाध्येनैव व्याख्यातानि वर्तन्ते । तद्यथा–

**स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च ।**
**नेतरावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च ॥**

अचः परस्मिन् पूर्वविधौ (पा.सू. १।१।६५) इति सूत्रभाष्ये लभ्यते । एवमेव दाधा ध्वदाप् (पा.सू.१।१।२०) इति सूत्रभाष्ये श्लोकमाध्येन च व्याख्या वर्तते । यथा–

**सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥**

## रावणार्जुनीयम्

कविना भट्टभूमेन रावणार्जुनीयम् अर्जुनरावणीयं वा लक्ष्यलक्षणप्रधानं श्लोकात्मकं महाकाव्यं रचितमस्ति।काव्येऽस्मिन् पाणिनीयाष्टाध्याय्याः स्वरवैदिकविषयसूत्रैर्विना सूत्रक्रमेण तत्तत्सूत्रसिद्धविशिष्टप्रयोगनिदर्शनाय प्रयत्नः कृतो वर्तते । अष्टाध्याय्याः प्रथमपादस्य सञ्ज्ञापरिभाषात्मकत्वेन साक्षाच्छब्दसाधकत्वाभावाद् अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीयपादादेव ह्युदाहरणपूर्वकविवरणं सूत्रनिर्दिष्टक्रमेणोपन्यस्तं वर्तते। विदुषा वासुदेवेन रावणार्जुनीयस्य व्याख्या प्रणीताऽस्ति। विविधैः प्रमाणै र्विद्वद्भि रावणार्जनीयकाव्यस्य समयो भट्टिकाव्यात्पूर्वं क्षेमेन्द्ररचितसुवृत्ततिलकाच्च पूर्वं ६०० तमे खीस्तशताब्दे स्वीकृतो वर्तते (मीमांसक, वि.सं.२०४१, पृ.४७७) इति ।

## भट्टिकाव्यम्

पौरस्त्यवाङ्मये कृतिकाररूपेण लब्धप्रतिष्ठिता भर्तृहरिनामकाः पञ्चसङ्ख्यका विद्वांस आसन्। भारतस्य शासनकाले वलभीश्रीधरसेननामकाः चत्वार राजानो बभूवुः। तेषु तृतीयस्य राज्ञः श्रीधरसेनस्य समय ६००तमः खीष्टाब्दः स्वीक्रियते। अयं ब्राह्मण आसीत् । तस्यैव पुत्ररूपेण गुर्जरप्रान्ते लब्धजन्मना भर्तृहरिणा काव्यलेखनपरम्परायायां व्याकरणोदाहरणात्मकं भट्टिकाव्यं विरचय्य श्लोकात्मकव्याकरणस्य स्थानमुत्कृष्टतरं निर्धारितम् । महाकाव्येऽस्मिन् प्रकरणविशेषमवलम्ब्य विशिष्टपदावल्याः सङ्ग्रथनं कृतमस्ति। द्वाविंशतिसर्गात्मकेऽस्मिन् काव्ये प्रकीर्णकाण्डम्, अधिकारकाण्डम् , प्रसन्नकाण्डम्, तिङन्तकाण्डञ्चेति चत्वारि काण्डानि सन्ति । तत्र प्रकीर्णकाण्डानन्तरं द्वितीयेऽधिकारकाण्डे टाधिकारः, आमधिकारः,

द्विकर्माधिकारः, सिजधिकारः, श्नमधिकारः, कृत्याधिकारः,कृदधिकारः, (निरुपपद सोपपदश्च) निरधिकारः, किद् ङित्वाधिकारः, आत्मनेपदाधिकारः, कारकाधिकारःः, सिचिवृद्ध्यधिकारः, इट्प्रतिषेधाधिकारः, इडधिकारः, सत्वाधिकारः, षत्वाधिकारः णत्वाधिकाराश्चेति अष्टादशाधिकाराः समावेशिता विद्यन्ते । प्रसन्नकाण्डानन्तरं चतुर्थे तिङन्तकाण्डे नवलकाराणां रूपाणि नवलकाराधिकारप्रकरणे श्लोकमाध्यमेनोपस्थापितानि वर्तन्ते । यथा लिङधिकारे– धेयास् त्वं सुहृदां प्रीतिं वन्दिषीष्ठा दिवौकसः । सोमं पेयाश् च हेयाश् च हिंस्रा हानि करीः क्रिया (भट्टिः, ई.सं.१९८१, पृ.२१७) ।

भट्टिकाव्यस्य जटीश्वर– जयदेव –जयमङ्गलविद्वद्भि-र्जयमङ्गला- नाम्नीटीका, मल्लीनाथीया व्याख्या, रामचन्द्रशर्म्मणा व्याख्यानन्दनाम्नीटीका, विद्याविनोदेन भट्टिचन्द्रिका कन्दर्पशर्म्मणा सौपद्मव्याकरणानुसारिणीटीका, पुण्डरीकाक्षेण कलापदीपिका, हरिहरेण भट्टिबोधिनीव्याख्या, भरतसेनेन मुग्धबोधव्याकरणानुसारिणीटीका, शेषराजशर्म्मणा चन्द्रकलाटीका, गोपालशास्त्रिणा काव्यमर्मविमर्शिकाव्याख्या, लोकमणिना कलाटीका, चन्द्रमौलिद्विवेदिना शिखानाम्नीटीका इत्यादयो व्याख्याग्रन्था रचिता वर्तन्ते ।

**कविरहस्यम्**

कविगुह्यनामाभिधं २७४सङ्ख्याकश्लोकयुतं कविरहस्यं शास्त्रकाव्यं ९७५–१०५० मितवैक्रमाब्दानभितः स्थितिमता हलायुधेन प्रणीतं विद्यते । अस्मिन् काव्ये प्रायशो धातव एव निर्दिष्टाः सन्ति । अस्योपरि द्वे व्याख्ये उपलभ्येते ।

**कुमारपालचरितम् (द्व्याश्रयकाव्यम्)**

निजनिर्मितशब्दानुशासनस्य संस्कृतप्राकृतोभयलक्षणलक्ष्यनिदर्शनाय ११४५–१२२९मितवैक्रमाब्दानभितः स्थितिमता हेमचन्द्राचार्येण अष्टाविंशतिसर्गात्मकं कुमारपालचरितं (द्व्याश्रयकाव्यम्) महाकाव्यं श्लोकमाध्यमेन विरचितमस्ति । अत्र स्थिता आद्या विंशतिसर्गाः संस्कृतभाषाबद्धाः, शेषा अष्टौ तु प्राकृतभाषानिबद्धाः सन्ति ।

**सुभद्राहरणम्**

कविर्नारायणो ब्रह्मदत्तस्य पुत्र आसीत् । अनेन व्याकरणोदाहरणात्मकं सुभद्राहरणं काव्यं पद्येन प्रणीतमस्ति अस्मिन् काव्ये षोडशसर्गा विलसिता विद्यन्ते । विषयश्चात्र रावणार्जुनीय इव अष्टाध्यायीक्रमेण सन्निविष्टो वर्तते । अस्य च विवरणं स्वयमेव महाकविना विरचितमस्ति ।

**वासुदेवविजयकाव्यम्**

वासुदेवविजयकाव्यं सर्गषडात्मकं वर्तते । तत्रोत्तरार्धस्थं सर्गत्रयं हि धातुकाव्यनाम्ना व्यवह्रियते। संस्कृतवाङ्मये काव्यकर्तृत्वेन लब्धप्रतिष्ठितेषु त्रिषु वासुदेवकविषु वासुदेवविजयस्य (वासुदेवचरितस्य) कर्ता केरलान्तरवर्तिपुरुवनग्रामवास्तव्यो वासुदेवो वर्तत इति बलदेवोपाध्यायस्य मतम् । वासुदेवविजयकाव्ये लक्ष्यलक्षणोभयात्मका विषया विवेचिताः सन्ति । अष्टाध्यायीक्रमेण सम्पूर्णसूत्राणामुदाहरणात्मकं विवरणञ्चात्र समावेशितमस्ति ( उपाध्यायः, वि.सं.२०५८, पृ.३८८) ।

**धातुकाव्यम्**

१६१७–१६३३ मितवैक्रमाब्दानभितः स्थितिमता नारायणभट्टेन वासुदेवविजयाभिधकाव्यशेषपरिपूरणाय चतुः सर्गात्मकं धातुकाव्यं विरचितमस्ति । अक्रूरयात्रावर्णनादारभ्य कंसवधपर्यन्तस्य श्रीमद्भागवतस्य कथाऽधारेण प्रणीतेऽस्मिन् काव्ये माधवीयधातुपाठस्योदाहरणानि चामत्कारिकशैल्या वर्णितानि सन्ति । अस्य रामपाणिपादेन

सव्याख्यहस्तलिपे र्व्याख्या कृता इति लभ्यते । यद्यपि धातुकाव्ये त्रिषु सर्गेषु समस्ता धातव उदाहृताः सन्ति, वासुदेवविजयकाव्ये तु प्रथमाध्याये ७४०, द्वितीयाध्याये ६९७, तृतीये ५०७ इति कृत्वा १९४४ धातव उदाहृताः सन्ति, तथापि विषयवस्तुवर्णनक्रमे काव्यद्वये साम्यं लभ्यते । अधिकतरविद्वांसः प्रक्रियासर्वस्वकार एव श्लोकात्मकधातुकाव्यस्य लेखक इति स्वीकुर्वन्ति । आचार्यो लोकमणिदाहाल अम्बिकादत्तव्यासविरचितगुप्ताशुद्धिप्रदशर्नमपि श्लोकात्मकव्याकरणकाव्यस्य लघुकाव्यत्वं स्वीकरोति ।

काव्यमाध्यमेन श्लोकात्मकव्याकरणलेखनपरम्परायां भर्तृहरे र्भट्टिकाव्यमिव मोहनभट्टेनापि कंसवधमहाकाव्यं प्रणीतमस्ति । काव्यमिदं प्रक्रियापक्षमाधारीकृत्य कृष्णकथामाध्यमेन रचितम् । एकविंशतिसर्गात्मकेऽस्मिन् काव्ये सन्धौ ६२ श्लोकाः सुबन्ते २३३ श्लोकाः कारके १२५श्लोकाः समासे ६० श्लोकाः तद्धितप्रकरणे च २३३श्लोकाः समाविष्टा वर्तन्ते । अप्रकाशितमिदं पुस्तकं मुम्बईस्थ रायल एशियाटिक सोसायटी पुस्तकालये सुरक्षितं वर्तते । एतदतिरिक्तं काव्यात्मकव्याकरणलेखनपरम्परायां रावणार्जुनीयकाव्यस्य शैलीमवलम्ब्य योगीन्द्रनाथतर्कचूडामणिना दशाननवधकाव्यम्, महापण्डितेन दिवाकरेण महाभारतस्य कथावस्तु अनुसृत्य चतुर्दशसर्गात्मकं लक्षणादर्शनामकं काव्यं प्रणीतमस्ति । काव्येऽस्मिन् पाणिनीयव्याकरणसंबद्धनियमाः श्लोकात्मना सुस्पष्टरूपेण वर्णिताः सन्ति । अपरेण कवीन्द्राचार्यदिवाकरेण विंशतिर्गात्मकं काव्यात्मकं भारतामृतनामकं श्लोकव्याकरणं प्रणीतमस्ति । देवीप्रसादशुक्लेन च पाणिनिप्रकाशनामकं काव्यात्मकं श्लोकमयं व्याकरणं रचितम् । सिद्धान्तकौमुद्यां प्रतिसंस्कृतकौमुद्यां प्रक्रियाकौमुद्याञ्च कतिपयस्थले गूढार्थस्फोरणं सूत्राणामर्थापनं पदकृत्यार्थबोधनं प्रक्रियास्थले फक्किकार्थसङ्घट्टनादिकार्यञ्च श्लोकमाध्यमेनैव प्रस्तुतं वर्तते । तथा च वाक्यपदीयशब्दकौस्तुभप्रभृतिषु व्याकरणस्य दार्शनिकग्रन्थेषु काव्यरसास्वाददायका व्याकरणविषया काव्यमुखेन प्रणीता वर्तन्ते । नेपालदेशीयै र्वैयाकरणैः पद्येन रचितानि व्याकरणकाव्यानि च सन्ति । अस्मिन् क्रमे विदुषा कुलचन्द्रगौतमेन लकारार्थबोधनपरं कृष्णकर्णाभरणकाव्यं विरचितं वर्तते । अत्र लकारार्थसम्बद्धाः सूत्रार्थवृत्युदाहरणाविषयाः पद्यमाध्यमेनैव वर्णिताः सन्ति । हरिशरणोपाध्यायलम्सालमहाभागेनापि श्लोकात्मकव्याकरणलेखनक्रमे व्याकरणदर्शन- विषयकं शब्दब्रह्मशतकम् शास्त्रकाव्यं प्रणीतमस्ति । विद्वन्मूर्धन्येन नयराजपन्तेनाऽपि धातुरूपावल्यात्मकं श्लोकमयमप्रकाशितं रूपावलिपद्यम् विरचितमिति विद्वान् दिनेशराजपन्तः समुद्घोषयति । नेपालीविद्वत्परम्परायां पण्डितराजसोमनाथसिग्देलेन सिद्धान्तकौमुदीं संस्कृत्य प्रतिसंस्कृता विहिता । इयं प्रतिसंस्कृतकौमुदी अधिकतरा गद्यमयी वर्तते, तथापि वैयाकरणसिद्धान्तनिष्पन्नाः श्लोका काव्यमुखेन व्याकरणनिर्माणपरम्पराविश्लेषणक्रमेऽनुसन्धेया वर्तन्ते । वैयाकरणसिध्दान्तकौमुद्यध्ययनाध्यापनक्रमे समागतं काठिन्यं परिहर्तुं पण्डितसुरेशझामहोदयेन श्लोकसिद्धान्तकौमुदी विरचिता वर्तते । श्लोकसिद्धान्तकौमुद्यां सुरेशस्य लेखनी काव्यमुखेन र्वैयाकरणसिद्धान्तकौमुदीसंस्करणाय प्रवृत्ता । काव्यमुखेन व्याकरणनिर्माणपरम्परायां सुकृतिदत्तपन्तेन सिद्धान्तवादः स्फोटवादेत्यादिव्याकरणसम्बन्धिनो ग्रन्था निर्मिता वर्तन्ते । तेषां ग्रन्थानां क्रोडपत्रहस्तलिपिप्रभृतयः सामग्र्च अभिलेखालये सुरक्षिताः सन्ति ।

## निष्कर्षः

भगवतः शङ्करादारभ्य अधुना यावत् प्रचलितायां सुमहत्यां व्याकरणनिर्माणपरम्परायां व्याकरणस्य विविधान् विषयानवलब्य ग्रन्था निर्मिताः सन्ति । सूत्रक्रमानुसारि व्याख्यानक्षेत्रे प्रक्रियाक्रमानुसारि व्याख्यानक्षेत्रे च काव्यमुखेन पद्यमयीं शैलीं प्रयुज्य पुस्तकानि विरचितानि सन्ति । इयं शैली कवित्वशक्तिमापिका विशिष्टा वर्तते । काव्यमुखेन व्याकरणाध्ययनाध्यापनकार्ये नूतने । विश्लेषणविहितेषु जाम्बवतीविजयम्, बलचरितम्, स्वर्गारोहणमहाकाव्यम्, महानन्दकाव्यम्, रावणार्जुनीयम्, भट्टिकाव्यम्, कविरहस्यम्, कुमारपालचरितम्,

सुभद्राहरणम्, वासुदेवविजयम्, धातुकाव्यमित्यादिषु काव्यग्रन्थेषु व्याकरणस्य सुबन्तकारकसमासतद्धिततिङन्त–कृदन्तादिविविध- विषयवस्तूनि समावेशितानि सन्ति । अत्र गद्यमाध्यमेन प्रचलितं व्याकरणाध्ययनकार्यं परिष्कृत्य विविधानां छन्दसां प्रयोगं विधाय पौराणिककथावस्तुमुखेन व्याकरणाध्ययनाध्यापनकार्यं रुचिकरं वैज्ञानिकञ्च कारितमस्ति । छात्राणां व्याकरणाध्ययनकार्यं रुचिपूर्णं कारयितुं तदध्ययनात् पलायनकार्यं माभूदिति वर्तमानकालिकी समस्या निराकरणाय च काव्यमुखेन विरचिता उपर्यन्वेषिता ग्रन्था अध्यापनार्हा सन्ति । काव्यमुखेन व्याकरणनिर्माणपरम्पराया उपजीव्यत्वं निधार्य व्याकरणकाव्यानां विशेषरूपेणानुशीलनं विश्लेषणकार्यमस्मिनन्नालेखे विहितम् । संस्कृतव्याकरणाध्ययनाध्यापनप्रणल्यां विश्वविद्यालयस्य पाठ्यक्रमे च पुनर्जागरणमानेतुं काव्यमुखेन रचितानां ग्रन्थानामध्ययनाध्यापनकार्यं सहायसिद्धं भवत्येव ।

## सन्दर्भसूची

उपाध्यायः, बलदेवः (वि.सं.२०५८) *संस्कृतवाङ्मयका बृहद् इतिहास,* (पञ्चदश-खण्ड), उत्तरप्रदेशसंस्कृतसंस्थानम् ।

दाहालः, लोकमणि (ई.स. १९९० )*व्याकरणशस्त्रेतिहासः,* भारतीयविद्याप्रकाशन ।

पतञ्जलिः, (ई.सं. २००२) *व्याकरणमहाभाष्यम्* (अनु.चारुदेव शास्त्री, पु.मु.सं.), मोतीलाल बनारसीदास ।

भट्टिः, (ई.सं.१९८१) *भट्टिमहाकाव्यम्,* (सम्पा.गोपालदत्त पाण्डेयः), द्वि.सं., चौखम्बासुरभारती प्रकाशन ।

मिश्रः, जगदीशचन्द्रः (ई.सं.२००९)*वैदिकवाङ्मयस्येतिहासः,* (पु.मु.सं.), चौखम्बासुरभारती प्रकाशन ।

मीमांसकः, युधिष्ठिरः (वि.सं. २०५१) *संस्कृतव्याकरणशास्त्र का इतिहास,* (प्र.भा.), रामलालकपुरट्रष्ट प्रेस ।

–––––, (वि.सं. २०३०) *संस्कृतव्याकरणशास्त्र का इतिहास,* (तृ..भा.), रामलालकपुरट्रष्ट प्रेस ।

वेदव्यासः, (वि.सं. २०२३) *अग्निपुराणम्,* चौखम्बासंस्कृतसिरिज अफिस ।

–––––, (वि.सं.२०४४) *शुक्लयजुर्वेदः* (सम्पा.दौलतरामगौडः ), चौखम्बाविद्याभवन ।

–––––, (वि.सं. २०५०) *ईशादि नौ उपनिषद्,* ,(अनु. हरिकृष्णदास गोयन्दका (अ.सं.), गीताप्रेस ।

–––––, (ई.सं. १९८६)*गरुडमहापुराणम्,* (सम्पा रामतेज पाण्डेयः) (पु.मु.सं.) चौखम्बाविद्याभवन ।

–––––, (ई.सं., १९८९) *बृहन्नारदीयपुराणम्,* (पू.भा.) (टि.का. प्रभात मिश्रः), हिन्दीसाहित्यसम्मेलनम् ।

–––––, (वि.सं. २०६३) *भविष्यपुराणम्,* (पु.मु.सं.), द्वि.ख., गीताप्रेस ।